P13033
19/10/03

Serving JinShasan
109303
gyanmandir@kobatirth.org

॥ गच्छाधिपति–पूज्यपादाचार्य–श्रीदेवजित्स्वामिने नमः । नागेन्दुगुरवे नमः ॥

॥ स्व. पूज्यपादाचार्य–श्रीकर्मसिंहजित्स्वामि–स्मारक–शास्त्रमालाया–मौक्तिकं ५७ ॥

# ॥ हृत्परिवर्त्तनोपरि ज्योतिश्चन्द्रस्य चरित्रम् ॥

: रचयिता :

स्व० पूज्यपादाचार्य–गुरुदेव–श्रीनागचन्द्रजित्स्वामि–शिष्यः—

पंडित–मुनिश्री–रत्नचन्द्रजित्स्वामी ॥

: प्रकाशक :

पंडित–मुनिश्री–छोटालालजिन्महाराज–प्रेरणया–मंजल–मेगवाना–अष्टकोटि–बृहत्पक्षीय–श्रीसंघः ॥

॥ प्रथमावृत्तिः ॥ ॥ प्रतिसंख्या ५०० ॥

॥ वीराब्दम्–२४८२ ॥ ॥ विक्रमाब्दम् २०१२ ॥

॥ मूल्यम–मूल्यमु : वाचनं, प्रबोधनं परिशीलनं च ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

107303



## શ્રી જ્યોતિશ્ચન્દ્ર ચરિત્ર પ્રકાશનમાં સહાકાયની યાદી.

૧૦૧) શાહ રતિલાલ ગોવિંદજી. પોતાના પિતાજીના સ્મરણાર્થે.
૫૧) શાહ પ્રેમચંદ ધારશી. તેમના ભાઇ રવજીના સ્મરણાર્થે.
૫૧) શાહ લવજી ઘેલા. તેમના પુત્ર વિક્રમશીભાઈના સ્મરણાર્થે.
૫૧) શાહ લવજી ખીમજીના સુપુત્રો. પોતાના પિતાશ્રીના સ્મરણાર્થે.
૫૧) શ્રાવિકાં કુંવરબાઈ વિસનજી.
૧૫) મ્હેતા લાણજી નારાણજી.
૧૧। શાહ આણંદજી લાલજી.
૧૦। શાહ માધવજી દેવચંદ. તેમના માતાજીના સ્મરણાર્થે.

મળવાનું ઠેકાણું—

**શાહ રતિલાલ ગોવિંદજી.**

**(વાયા કચ્છ–ભુજ) કચ્છ મંઝલ–મંગવાણા.**

ટપાલ ખર્ચ છ આના મોકલવાથી ભેટ મળશે.

મુદ્રક : શ્રી બહાદુરસિંહજી પ્રિં. પ્રેસ : પાલીતાણા. (સૌરાષ્ટ્ર)



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

स्व० पूज्यपादाचार्य–गुरुदेव–श्रीनागचन्द्रजित्स्वामिने

# ❀ समर्पणम् ❀

संसारात्सागरान्नेत्रे, ज्ञानदानाधिकारिणे ।
प्रपित्सवेऽक्षयं स्थानं, नागेन्दुगुरवे नमः ॥

भो कृपालो गुरुदेव! संसारसागरनिमज्जन्नहं सदयैः श्रीमद्भिरुद्धृतः ॥ पशुतुल्यजीवनजीवन्तं मां भवदौदार्यगुणमयशान्तमुद्रयाऽऽकृष्य भवद्भिर्मनुष्यत्वे स्थापितोऽहम् ॥ मद्धृत्क्षेत्रे सज्ज्ञानात्मककल्पतरुसमारोपेणाऽहं भवद्भिरतीवोपकृतोऽस्मि ॥ यद्यहं भवदाज्ञानुसारेण सञ्चरणशीलो भवेयं तदैव तद्भवदुपकृतिऋणमुक्तो भवितुमहं क्षमः स्यां, नान्यथा ॥ तथापि मद्धृत्क्षेत्रोद्गतभवद्रोपितज्ञानकल्पद्रुमस्य किञ्चित्फलस्वरूपमिदं ज्योतिश्चन्द्रचरित्रं श्रीमच्चरणकमले विनयभक्तिभावपूर्वकं समर्पयामि तच्छ्रीमन्तः स्वीकुर्युर्येनाऽहं कृतकृत्यो भवामीति ॥

वीराब्दम् २४८२
कच्छ–भुजनगरम्,
मार्गशीर्षकृष्णचतुर्दशी,
बुधवासरः ।

॥ श्रीमत्पादारविन्दमधुपः—
शिष्य–रत्नेन्दुः ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

# અર્પણ પત્રિકા.

## સ્વ. પૂજ્યપાદ આચાર્ય ગુરૂદેવ શ્રી નાગચંદ્રજી સ્વામી !

લઘુવયમાં આપશ્રીજીએ દીક્ષા લીધી. સ્વ. પૂજ્યપાદ આચાર્ય શ્રી કર્મસિંહજી સ્વામી જેવા જ્ઞાની, ધ્યાની અને મહાપ્રભાવક ગુરૂદેવના સમાગમથી આપશ્રીજીએ તલસ્પર્શી જ્ઞાન સંપાદન કર્યું. શાંત, દાંત, જ્ઞાન પ્રચારક અને ભવ્ય-જનોને મધુર વાણીથી સદુપદેશ આપી સન્માર્ગે ચડાવનાર એવા આપશ્રીજીએ યોગ્ય-સુપાત્ર શિષ્યોને અપૂર્વ જ્ઞાન અને શિક્ષા આપી વિદ્વાન-વક્તા-પંડિત બનાવી સમાજ ઉપર અથાગ ઉપકાર કર્યો છે.

આપશ્રીજી અમારા ગામમાં અવારનવાર પધારતા. અમારા ઉપર આપશ્રીજીની પૂર્ણ લાગણી હતી. આપશ્રીજીનો ઉપકાર અને લાગણીને વશ થઈ અમારો શ્રી સંઘ પંડિત મહારાજ શ્રી રત્નચંદ્રજી સ્વામીએ બનાવેલ હૃદયના પલટા ઉપર શ્રી જ્યોતિશ્ચંદ્ર સંસ્કૃત ચરિત્રના પ્રકાશનમાં આર્થિક સહાયક બની અમો આ પ્રકટ થયેલ ચરિત્રરૂપ પુષ્પાંજલિ આપશ્રીજીનાં ચરણુ કમળમાં અર્પણ કરીએ છીએ, તે આપશ્રી સ્વીકારી સ્વર્ગમાં રહ્યા થકા અમારા આત્માના ઉદ્ધાર માટે પ્રેરણા કરશો, એવી પ્રાર્થના કરી વિરમું છું.

સં. ૨૦૧૨ ના<br>પોષ શુદ ૫ ને મંગળ.

લિ૦ આપશ્રીજીના ચરણુનો સેવક,<br>રતિલાલ ગોવિંદજી.<br>કચ્છ મંઝલ-મંગવાણા.



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

# પ્રસ્તાવના.

સર્વ ગતિઓમાં મનુષ્યગતિ ઉચ્ચ છે. મનુષ્ય સિવાય બીજી ગતિમાંથી મુક્તિ પ્રાપ્ત થઇ શકતી નથી. મુક્તિ મળે નહિ ત્યાં સુધી મનુષ્યે તેના માટે સાધના કરવાની છે. તેની સાધનાનો માર્ગ અનંત જ્ઞાનીઓએ બતાવેલ છે. જ્ઞાનીઓએ બતાવેલ માર્ગે ચાલી અનંત જીવો પૂર્વકાળમાં મુક્તિગામી બન્યા છે. વર્ત્તમાનમાં પણ જીવો મહાવિદેહ ક્ષેત્રમાંથી મુક્તિ મેળવે છે. આગામી કાળે પણ અનંત જીવો મુક્તિ રમણીને વરશે.

તેમાં મુખ્ય સાધન હૃદયનો પલટો છે. હૃદયનો પલટો થયા સિવાય તપ, જપ, સંયમ વિગેરે સાધના નિષ્ફળ થાય છે. હૃદયનો પલટો થતાં અનંતકાળના દુર્ગુણો દૂર થાય છે. અવળાઈ અને નબળાઇ ચાલી જાય છે. આત્મામાં રહેલા સદ્ગુણો ક્રમસર પ્રગટ થતા આવે છે. કરેલાં અનુષ્ઠાનો—તપ, જપ, સંયમ વિગેરે સફળ થાય છે. આત્મા ક્રમસર આગળ વધતાં અનંત શક્તિમાન અને અનંત જ્ઞાનવાન બની નિજાત્મસ્વરૂપમાં તલ્લિન બની શકે છે.

તે હૃદયના પલટા ઉપર જૈન પ્રકાશ પેપરમાં આવેલી ગુજરાતી ભાષામાં જ્યોતિશ્ચંદ્ર નામના એક થોડા કાળ ઉપર થઇ ગયેલ સત્પુરૂષની આખ્યાયિકા વાંચવામાં આવી અને તે બોધક જાણવાથી તેના આધારે સ્વ. પૂજ્યપાદ આચાર્ય ગુરૂદેવ શ્રી નાગચંદ્રજી સ્વામીના શિષ્ય પં. મહારાજ શ્રી રત્નચંદ્રજી સ્વામીએ કચ્છ છસરા ગામમાં ગુરૂમહારાજની હાજરીમાં સંસ્કૃત ભાષામાં ચરિત્ર બનાવ્યું. જ્યોતિશ્ચંદ્રનું જીવન પ્રથમ કેવું અધમ હતું અને પછી નિમિત્ત મળતાં, હૃદયનો પલટો થતાં કેવું ઉચ્ચ જીવન બન્યું ? તેનું આબેહૂબ વર્ણન કરવામાં આવ્યું છે. જે ચરિત્ર સંસ્કૃતના અભ્યાસીઓ માટે વ્યાખ્યાનાદિ વાંચનમાં ઘણું જ ઉપયોગી નીવડશે, તેમાં બે મત નથી.

॥ ૫ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

પં. મહારાજ શ્રી છોટાલાલજી સ્વામી ઠા૦ ૩ છસરા ગામથી ચાતુર્માસ પૂર્ણ થયે કાંઠીનાં કેટલાક ગામો ફરીને પૂજ્ય મહારાજ શ્રી કૃષ્ણજી સ્વામીના દર્શનાર્થે ભુજનગર પધાર્યા. ત્યાં નવ દિવસ રોકાઈ મંઝલ શ્રી સંઘના અત્યાગ્રહથી માનકુવા અને સામંતરાય થઈને મંજલ પધાર્યા. મંઝલથી વિથોણ, અંગીયા અને નખત્રાણા ફરી પાછા મંઝલ પધાર્યા. ભુજથી માંડી દરેક સ્થળે જાહેર પ્રવચનો દ્વારા જૈન જૈનેતર જનતાને ખૂબ લાભ આપ્યો.

પં. મુનિશ્રીએ શ્રી જ્યોતિશ્ચંદ્ર ચરિત્ર છપાવવાની મંઝલ શ્રી સંઘ પાસે વાત મૂકી અને મંઝલ શ્રી સંઘે તેમનું વચન માન્ય કરી રૂ. ૩૪૧।। નો ફાળો કરી આ ચરિત્ર છપાવવામાં સહાયતા કરી, જેથી આ ચરિત્ર છપાઈ બહાર પડેલ છે. જેના વાંચનનો લાભ સાધુ–સાધ્વીયો અને સંસ્કૃતના અભ્યાસીઓ પોતે લે અને અન્ય જનતાને વાંચી સંભળાવે એવી અભ્યર્થના છે. આ ચરિત્રનાં વાંચન અને શ્રવણથી વક્તા અને શ્રોતાઓનાં હ્રદયનો પલટો થાય એમ ઇચ્છી વિરમું છું.

લિ૦ ચતુર્વિધ શ્રી સંઘનો સેવક,
રતિલાલ ગોવિંદજી.
કચ્છ મંઝલ મંગવાણા.



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

श्रीहृत्परिवर्त्तनोपरि ज्योतिश्चन्द्रस्याऽऽख्यायिका ॥ मंगलाचरणम्–अनुष्टुब्–वृत्तम्—

ॐ श्रीवीरं नमस्कृत्य, सद्गुरुं भारतीं तथा हृत्परिवर्त्तनस्याऽहं, कथये सुकथां गताम् ॥१॥

श्रीज्ञानिपुरुषः शास्त्रे कथितमस्ति यज्जगति स्थिताः सर्वाप्रणिनः कर्माधीनाः सन्ति। अनादितः सुवर्णमृत्तिकावत् संसार–स्थितानामात्मनां कर्मणां च संबंधोऽस्ति ॥ ये कर्मनिर्मुक्तजीवा, लोकाग्रसिद्धक्षेत्र स्थितास्ते जन्मजरामृत्युरोग-शोकाऽऽधिव्याध्युपाधि विमुक्ताः, सिद्धाः–परमेश्वरा उच्यन्ते तेत्वपुनर्जन्मानः सन्ति ॥ ये पुनः कर्माधीनास्ते नरकतिर्यङ्मनुष्यदेवगतिकल्पचतुर्गतिरूपसंसारस्थिताश्छद्मस्थाः–संसारिणः प्रोच्यन्ते, ते च चतुरशीतिलक्षजीवयोनिषु जन्मजरा-मृत्युरोगशोकादिदुःखान्विताः परिभ्रमणं कुर्वन्ति ॥ चतुर्गतिषु भ्रमणं कुर्वज्जीवानां कर्माणि पराधीनतया क्षुत्तृट्शीता-तपच्छेदनभेदनादिक्लेशान् परिषह्याऽकामनिर्जरया यथा यथा क्षीयन्ते तथा तथा जीवा उच्चोच्चतरगतिं प्राप्नुवन्ति, क्रमेण च मनुष्यभवमधिगच्छन्ति। मनुष्यगति–स्थिताऽऽत्माऽपि स्वकर्मानुसारेण सुखी .. दुःखी वा भवति। शुभकर्मोदये सत्यपि सत्तायामशुभकर्माणि प्रायः सन्त्येव, तथैवाऽशुभकर्मोदये सत्तायां शुभकर्माण्यपि भवन्ति। पापानुबन्धिपुण्यो-दयेन जीवात्मा सर्वेष्टशुभसाधनसम्पन्नः सुखी सन्नपि दयासत्याऽस्तेयशीलसंतोषसमतानम्रतासरलतौदार्यमैत्रीभावपरोप-कारादिसद्गुणविहीनो भवति। नृपादिमानितो, धनयौवनसंपत्तिप्रभृतिगर्वाक्षिप्तश्च भूत्वा निर्दयत्वेन बहुपामराञ्जीवान् संतापयति, घातयति, लुंटयति, काराग्रहे च क्षेपयति। इत्यादिदुष्कर्माणि कृत्वा धर्मविमुखः सन् प्रान्ते स्वकृतकर्म-फलस्वरूपामतुलां वेदनां सोढ्वा मृत्वा च दुर्गतिं याति ॥ कश्चित्पुनस्तादृशः पापानुबन्धिपुण्यवान् मनुष्यः सुखीभूतः, पूर्ववद्गर्वाक्षिप्तोऽनीतिमार्गे नीतो, दुष्कर्माणि कृत्वा, पश्चात् पापघटस्फुटनेन, भूपाद्यवमानितो, निःस्वो, दुःखी च



P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

भवति । तदा स्वपापाचरणानि स्मारयति । पश्चात्तापं करोति । न कमपि दूषयति । तस्य हृत्परिवर्त्तनं भवति । समागतं दुःखं समतया सहते । सरलीभूय नीत्या प्रवर्त्तते । दयासत्यादिगुणान् धारयति । सर्वभूतेष्वात्मवत्प्रवृत्तिं करोति । तादृशस्तु विरलजीवो ज्योतिश्चन्द्रवत् स्वात्मानं प्रख्याप्योज्ज्वाल्य, परोपकृतिं च कृत्वा सद्गतिं प्राप्नोति ॥ ज्योतिश्चन्द्रकथा यथा—अस्मिन् भारतेऽमरपुराऽऽख्ये नगरे ज्योतिश्चन्द्राभिधो युवकः, पूर्णपुण्यवान्, विद्वान्, राज्ञा न्यायाधिकारीपदे स्थापितः सुखी चाऽऽसीत् । परं स देवगुरुधर्मस्वरूपविमुखोऽभवत् । केवलं धनसंग्रहणवृत्त्याऽनीत्यऽन्यायाऽसत्यमार्गेणैव प्रावर्त्तत । अज्ञमन्दबुद्धिजनेभ्यो यावच्छक्यं लाभं सत्ताबलेन गृह्णातिस्म । द्रव्यदर्शनमात्रप्रवृत्ता तस्य दृगूद्रविणतेजसि न्यायविरुद्धप्रवृत्तिमपि क्षुल्लकामपश्यत् । सदोषान्निर्दोषीकरणे निरपराधींश्च तद्धनहरणपूर्वकं सापराधीकरणे तु तस्य निरंतरा लीलाऽऽसीत् । राजशासनं [ કાયદો ] न्यायं करोति तत्पूर्वं स्वयं लक्ष्मीबलेन जनविवादस्य समग्रमपि निर्णयमकरोत् ॥ श्रूयते यदयमेकदा सप्तसतिवर्षवृद्धस्यैककृषिकारस्य केवलमेकस्यैव युवकपुत्रस्योपरि कूटमनुष्यवधारोप-[ ખૂનનો ] मारोप्य वध-[ ફાંસીની ] शिक्षामकारयत् । तदा तज्जरठजनकः सुतार्थं मस्तक-मास्फाल्य प्राणाञ्जलिं दत्तवान् ॥ एकस्या वृद्धमहिलाया नवोढं विंशतिवर्षीऽवस्थपुत्रं चौर्या आक्षेपं दत्त्वा पंचवर्षं यावत् कारागृहेऽक्षेपयत् । तदा तस्य जरठजनन्या कारागृहं विकलया इव प्रदक्षिणीकृत्य ओ रामला ! (२) इति पुनः पुनः पूत्कृत्यान्ते प्राणाः समर्पिताः, पुत्रवधूश्च क्वापि नष्टं गता ॥ जनरक्तपिपासुः पानाचन्द श्रेष्ठ्यप्यस्य न्यायाधीशस्यैव साहाय्येन वस्ताखांटनामकृषिकारं पूर्णप्रवर्त्तमानचातुर्मासि तद्गृहं शीलं दापयित्वा ( જપ્ત કરી ) ग्रामबहिष्कृतं कारितवान् । तदा तस्य पंचदशवार्षिककुरिकाभिधसूनुः शिवमंदिरवेदिकायामेव (ઓટલા ઉપર જ) शीतपराभूतो मृतः ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

एतादृशानि तु वृत्तानि बहूनि तेनाऽऽचरितानि दैवपुस्तकारूढानि जातानि। तथापि ज्योतिश्चन्द्रस्तदा तानि तु न कानिचिदपीत्यमन्यत। स तु मन्यते स्म यत्–अनुष्टुबू–प्रज्वलतु गृहं कस्या–पि वा मरतु पुत्रकम्। किन्तु निजात्मनः कार्यं, येन केनाऽपि जायतु ॥ १ ॥ तथाऽप्यज्ञानाऽन्धानां जगति ह्ययं सज्जनो गण्यते स्म। व्यवहारकुशलतावचन-चातुरीधूर्त्तंतादिकलया तस्य कालकृत्यान्यप्रकटी–भवन्ति स्म। कदाचिच्च कोऽप्यन्यायं पश्यति स्म जानाति स्म वा तदपि सत्यं कथयितुं न शक्नोति स्म। स्वकीयदुःस्थिततया वा नैव प्रभवति स्म। पुण्यप्राबल्यात्तस्य परलोकपीडा-यास्तु भी नाऽऽसीदेव, यतो–' भवान् स्वर्गं गमिष्यति, भवत्कृते स्वर्द्वाराण्युद्घाटितान्येव सन्ति, द्यु–लोको वा भवंतं समीहते ' इत्यादि प्रसत्ति–कारकवचनप्रख्यापका ज्योतिर्विदादयस्तस्य सत्तादिभयकारणैः प्रभूता एव विश्वे विद्यन्ते स्म। परन्तु पापपुण्यानामपि सीमा तु भवत्येव ॥ अन्येद्यु ज्योतिश्चन्द्रस्य पापघटः संपूर्णो भृतवान्। एकदा जाफराख्य-घातकिना स्वकार्यविरोधिमानवस्य घातो विहितः। स्वकीयमानवघातापराधः पुष्कलद्रव्यदानेन कूटसाक्षिकम-नुष्यै निशायामुच्चैः स्वरेण प्रभुभजनकारिणो भजनानन्दिमाधवदासाभिधनिरपराधिसाधोरुपरि निन्द्राभंगेर्ष्यया तेन वध-केन प्रक्षिप्तः। जाफरदत्तप्रभूतधनलुब्धेन तेन ज्योतिश्चन्द्रेण न्यायाधीशेनाऽपि गतापराधसाधुर्नरवधाक्षेपवान् विहितः। जाफरस्थाने माधवदासः कारागृहे क्षिप्तः। न्यायकार्यमन्तिममेवाऽवशिष्टमासीत्। जाफरलाभ एव न्यायनिर्णयो भवि-ष्यतीति सम्भव आसीत् ॥ हृदि स्थितपापशल्यं कदा कदा त्वेतादृशं तीव्रं भवति यत् क्रूरातिक्रूर–मानवोऽपि तत्सोढुं न शक्नोति। एवमेव जाफरस्य हृद्यप्येवं जातं ' मत्कृतं घातपापं निर्दोषसाधूपरि मया क्षेपितं तन्न वरं कृतमिति '। अतस्तेन न्यायसभामागत्य नृपजनवृन्दराजवर्गीयपुरुषेषु स्थित्वा कथितं यज् ' जनवधस्तु मयैव कृतं किन्तु माधवदा- ॥ ३ ॥

P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

ससाधुस्तु निर्दोष एवाऽस्ति, मयैवेर्ष्यया तत्पापं तस्योपरि परिक्षेपितमस्ति ' ॥ न्यायसभाधिकारिजनानां कूटरचना प्रकटिता, परिणामे च न्यायाधीशस्याऽपि न्यायो राज्ञा कृतः । तस्य गृहसारं सर्वं गृहीत्वा ज्योतिश्चन्द्रः सप्तवर्षीय-कारागृहे क्षिप्तः । द्विवार्षिकडिम्भयुक्ता तस्य पत्नी निराधारा भ्रमंती जाता ॥ कारागृह-विमुक्तमाधवदाससाधुना यदै-तज्ज्ञातं तदा तस्य हृदयं रुदितम् । ' किं मन्निमित्तेनैतस्यैतादृशा स्थितिः ?, साधु गतबन्धनः सन् विश्वस्य शांति भवति, किन्तु मयि निर्बन्धने सति पामरस्याऽस्य कुटुंबस्य यत्र तत्र भ्रमणसमयः समागतः । अनुष्टुब्—

साधो मुक्तौ यदा कोऽपि, नरो भवति दुस्थितः । तदा तु मम साधुत्वं, निरर्थकं प्रभो ! तदा ॥ १ ॥
साधो मुक्तौ जगन्मुक्ति-र्बद्ध्यते तस्य बन्धने । साधुस्तु प्रापयेच्छान्तिं, जीवित्वा जीवयेत्परम् ॥ २ ॥
आत्मनो यस्तु कल्याणं, करोति साधुजीवने । तस्य स्मरणमात्रेण, नाम्नो दुःखानि ना वमेत् ॥ ३ ॥
जीवयति स्वय मृत्वा, तीर्त्वा परं च तारयेत् । अखण्डां प्रापयेच्छान्तिं, साधुतां वाहयेद् यतिः ॥ ४ ॥
साधुरात्मानमुच्चैः स्व-मुज्ज्वलयेत्तथा जगत् । विश्वे भानुस्वरूपोऽयं, तस्मै नमोऽस्तु साधवे ॥ ५ ॥

एवं हृदि विचिन्त्य तेन माधवदाससाधुना ज्योतिश्चन्द्रस्याऽशरणा पत्नी कथिता " मातर् ! मच्छुट्टनेन तवेदृग्-दशा संजाता ! । इयती मम साधुताऽपक्वा, दयां कुरु, तव पुत्रो लघीयान् वर्त्ततेऽतोमां जेष्ठपुत्रं मत्वाऽऽज्ञां कुर्या येनाऽहं तव पादरजो मूर्ध्नि समुद्वहेयमिति ।" ॥ अनेन दयामूर्त्ति-त्यागमूर्त्तिसदृशेन साधुना माधवेनैवाऽखिलकुटुंबः पोषितः पालितश्च । ज्योतिश्चन्द्रस्य बालस्तेन वर्द्धितः शिक्षितो विकासितश्च । एवं सप्तवर्षं यावत्तेनाऽस्य कुटुंबस्य निष्कामसेवा सम्यक् साधिता । ज्योतिश्चन्द्रस्य चारकमुक्तिदिन एव साधुर्माधवदासो निजानन्देऽदृश्यतां गतः । सक-



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

P13033

॥ ५ ॥ लकुटुंबस्तेन साधुतासुवासितहृदयेन यावज्जीवं रक्षितः प्रेरितः सन्मार्गे नीतः स्थापितश्च । कारागृहस्थितेन ज्योतिश्च-न्द्रेणेदं समग्रवृत्तान्तं ज्ञायते स्म । साधोर्माधवस्य जीवनेन सह स्वजीवनतुलनां कुर्वतस्तस्य नेत्राभ्यामश्रूणि पतन्ति स्म । कर्हिंचित्तु रुदन् रुदन् सोऽखिलां रात्रिं रोदनेनैवाऽनयत् । यदा चारकान् मुक्तस्तदा तस्य मनोमलोत्सर्गः प्रायेण जातोऽभवत् । सोऽधुना पूर्वात्यमानवशठो (શયતાન) नाऽस्थात् । पतिताऽऽपदा सः कोमलो जातः । कारा-गृहदुःस्थितया ( કંગાલીયત હાલતે ) स लघुतामविलासितां ( સાદાઇ ) च शिक्षितः । या करुणा ज्योतिश्चन्द्रस्य जीवनपर्यन्तं कदापि नोदपत्स्यत साऽनेन साधुना मृत्वोत्पादिता तथैव च तस्य हृदयं साधु कृत्वा तस्मिन् सेवाभा-वनोत्पादिता ॥ उटजसदृशजीर्णगृहे तस्य कुटुंबोऽवसत्तत्राऽऽगत्य कुटुंबसंमेलनेन साधुकृतसेवाश्रवणेन च सम्यक् सन्तुष्टः, किन्तु साधोरवसानं श्रुत्वाऽतीव खिन्नः । कुटुम्ब-निर्वाहार्थं ज्योतिश्चन्द्रो व्यवसायं कंचिदारब्धवान् । कष्टसाध्यसा-मान्यवस्तुव्यवसायं कुर्वतस्तस्य दशवर्षेण समीचीनाऽर्थप्राप्तिः संजाता । तदा तेन द्रव्येण स एकं चारुकर्पटापणं कर्त्तु-मशक्नोत् । व्यापारसहायकमेकं कार्यंकर-(મુનીમ) मरक्षत् । क्रय-विक्रयं नीत्या करोति स्म । असत्य-भाषणं न कदापि कुरुते स्म । न्यायनीतिसत्याचरणेनैव भाग्यं फलतीति तस्य दृढतया सिद्धान्तो (માન્યતા)ऽभवत् ॥ सेवकोऽ-वदद् यज् " जगति व्यापारे नीति नैव रक्षणीया, कूटप्रपंचेनैव धनोपार्जनं स्यात्, सर्वे व्यापारिणोऽनीत्यैव द्रविण-मर्जयन्तीति " ज्योतिश्चन्द्रः प्रतिभाषते स्म " प्रतिभु ! (મુનિમ) व्यापारे नीतिर्नैव भवति तद्वार्त्ता मम गले नाव-तरति, यद्यपि प्रतिष्ठा विस्तरावधि (શાંખ જામે ત્યાં સુધી) किंचिद् दुष्करं (આકરૂં) भासते किन्त्वन्ते तु नीतिरेव लाभप्रदा जायते । एकरूप्यकव्यापार आणकमात्रलब्धिः पर्याप्ता । तस्मादेकचतुर्थांश ( એક પૈસો ) आपणव्ययार्थं, ॥ ५ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

द्वितीयचतुर्थांशो मम कुटुंब–व्ययार्थं, तृतीयचतुर्थांशः कर्मकरस्य प्रतिदानार्थं (વળતર માટે), चतुर्थचतुर्थांशश्च पुना रोगि–दुःखितानामुपयोगार्थं स्थापनीयः, स सत्या नीतिरेव सत्यधर्मोऽस्तीति " ॥ संप्रति तस्य प्रतिष्ठा विश्वे विस्तृताऽऽसीत् तस्य कुटुंबे संपूर्णा शान्ति वर्त्तते स्म । अभिज्ञोऽज्ञातो वा, ग्रामीणो नागरिको वा, कृषिबलो व्यापारी वा सर्वेषामपि जनानां तस्योपरि संपूर्णो विश्वासोऽभवत् ॥ एकदा परदेशादेका वासोग्रन्थी (કપડાંની ગાંસડી) समागता। तन्मध्यात्पंचदश–ताका अपाययुक्ता (નુકશાનીવાળા) निर्गताः । तस्मै प्रतिताकाय सार्धैकरूप्यकं वस्त्रसंस्था (કુંપની) प्रतिदानमकरोत् (વળતર આપી), श्रेष्ठिना वेतनिकाय कथितमासीद् यद् " अस्माकं यत् प्रतिदानमागतमस्ति तदस्माभि र्ग्राहकेभ्यो देयमस्तीति ॥ कर्मकरस्त्विषल्लोभ्यासीदतस्तेनैकस्मायपरिचितचीनवास्तव्यग्राहकाय सहस्ररूप्यककर्पटेन सह तेऽपाययुक्ताः पंचदशताका अपि दत्ताः, किन्तुप्रतिदानं तस्मै न दत्तम् ॥ यदा श्रेष्ठी बहिस्तः समागतस्तदाऽऽपणस्य तेनाऽन्यवृत्तान्तैः सहेदमपि वृत्तं ज्ञात मेव । श्रेष्ठी दुःखमाप्नोद्, मृदुभाषया कंचिदुपालंभं ददन्नकथयद् यद् "रामजी ! पेटकसंस्थितषोडशशतरूप्यकेभ्यो यानि सार्धद्वाविंशतिरूप्यकान्य–न्याययुक्तानि (હરામના) सन्ति तानि पृथग् निष्कास्य मह्यं देहि, मयैतानि गृहे न रक्षितव्यानीति " ॥ रामजिता तानि रूप्यकानि श्रेष्ठ्यन्तिके स्थापितानि । तदा श्रेष्ठिना पुनरपि पृष्टं यद् " तव सम्यक् प्रतीति वर्त्तते यदि–मान्येवाऽन्याययुक्तानि सन्ति नाऽन्यानि ?, तेन ग्राहकेण त्वां किं दत्तमासीद् रूप्यकानि वा मुद्रितपत्राणी–ति (નોંટો) ? " " प्रभो ! (સાહેબ) ग्राहकेण तु मुद्रितपत्राणि रूप्यकानि चोभयानि दत्तान्यासन्, न च तेषु किंचिदपि चिह्न–(છાપ) मस्ति येन तान्युपलक्ष्यन्ते यत् कानि न्याययुक्तानि कानि चान्याययुक्तानीति ? "। सत्यमस्ति, तदुपलणं दुष्करमस्ति। रक्षाधूलिसदृशस्य कस्याऽपि वस्तुनः पृथक्करणकर्त्री ॥ ६ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

विज्ञानशास्त्र्यपि न्याययुक्तस्याऽन्याययुक्तस्य वा द्रव्यस्य पृथक्करणं कर्त्तु न शक्नोति, अत एव साधुपुरुषाः स्वांगोद्यमं प्रबोधयन्ति, स्पष्टन्याययुक्त–व्यवहारे च सावधानतयाऽवस्थातुं शंसन्ति। पेटकसंस्थितसर्वद्रव्यस्याऽन्याययुक्त–द्रव्यस्य व्यासंगो (ચેપ) जातः। तस्याऽथ सर्ववित्तस्य ममाऽऽवश्यकता नास्ति। अद्यैकदिने तत्प्रियं भविष्यति तदाऽन्यदा तादृगधिगमने स्वयं मनोऽभिलषिष्यति, पातयिष्यति च तदस्मान्। पश्चात्तु पतनमदूरमेवा–(હાથ વેંતજ) ऽऽयास्यति। अत एतादृशमहद्दुःस्थितिं–(પાયમાલી) निरूद्धाय तत्सर्वं वित्तमेकवस्त्रखण्डे (રૂમાલમાં) निबद्ध्य सागरे प्रक्षिप (પધરાવીદે), येन सकृत्तु पापं तलमुपविशतीति "॥ "श्रेष्ठिन्! इदं रिक्थमस्माकमापणेऽनावस्यकमस्ति तद्वार्त्ता तु सम्यगवबुद्धा, किन्तु वारिधौ तत्प्रक्षेपणादपि कस्मैचिद् धर्मकार्याय निःस्वजनेभ्यश्चोपयुज्यते तद्वरमिति "॥ धर्मकार्यं! (ધર્મા દે।!) अन्याययुक्तद्रविणस्य धर्मकार्यम्!। रामजी! धर्मकार्यं तु भवत्यस्माकं हृदयस्य शोणितेन, स्वांगपरिश्रमप्रस्वेदोत्पादितवसुनः। यद्विषपानं वयं न कुर्मस्तदन्यस्य पाययनमनुचितम्। अन्याययुक्तार्थो हालाहलादप्युग्रतरो भवति, तदन्यस्मै कथं दीयत एव?, तस्य तु विलयकरणमेवोचितं, येनेदं परस्याऽनिष्टं (ભૂરૂ) न कुर्यात्। अधुनाऽस्माकं धार्मिकसंस्थादेशोदयकार्यालय–(ખાતા) सामाजिकसंघ–पवित्रशिक्षणगृहप्रभृतिजगदुन्नतिस्थानेषु न्यायविहीनं धनमागच्छति तेनैव तेषां समीहितः समीचीनः परिणामो न दृश्यते। न्यायोपार्जितैककणोऽप्याढकप्रमाण (કળશી)–मुत्पादयति स्फारशक्तिं चार्पयति। यदीदं विषं यावत्पर्यन्तं गृहे स्थिरतरं भविष्यति तावद्वर्त्तमानप्रवर्त्तनं (વાતાવરણ) विलुप्स्यतीति" (બગાડશે)॥ एवं समालोच्याऽन्याययुक्तद्रव्यसंपृक्तसर्वधनं समुद्रे प्रक्षेप्य ज्योतिश्चन्द्रो नीत्या व्यापारं कुर्वन् कालं नयति स्म। कियत्कालानन्तरमेकदा समग्रप्रदेशे महाविशूचिकारोगोपद्रवः (કોલેરા) सहसा प्रसृतः। सहस्रशो मानवा ॥ ७ ॥

P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

मृताः । प्रायः प्रतिकुटुंबाद् यस्य कस्याऽपि भोगं व्याधिरगृह्णत् । ज्योतिश्चन्द्रेण व्यापारः पिधत्तः (બંધ કર્યો), सकुटुंबश्च स्वयं रुजाग्रस्तदीनानां सेवायां प्रावर्त्तत । स्वकीयस्वल्पानल्पवित्तं ( પોતાની થોડી ઘણી પુંજી ) स रुग्णजनौषधौ व्ययमकरोत् । सहस्राणां रोदनैरयं साधुहृज्ज्योतिश्चन्द्रः प्रभुमयः करुणामूर्त्तिसमोऽसृज्यत । यथाऽयमामयोऽनेकेषां गृहद्वाराणि पिधाय तेषां नामचिह्नान्यपि (નિશાન) व्यलुपत् (ભુંસી નાંખ્યાં) तथाऽस्य ज्योतिश्चन्द्रस्य एम. ए. इत्याख्यमांग्लभाषायाः पठनं कुर्वन्तमेकमात्रमेव पुत्रमप्यहरत् (ઝડપી લીધો), तदाऽस्य जरठजनको ज्योतिश्चन्द्रोऽरुदन् सेवायामेव हृच्छान्त्वनमकरोत् (માન્યુ) । पुत्रस्य स्मारकं सेवायज्ञेनैव व्यदधत् ॥ 'हे प्रभो ! मया तेऽकथ्योपकारः कथं विस्मर्यते ? । येषां कर्मणां दण्डरूपपरिणामोऽनेकै र्जन्मभिरनुभूयते तेषां मे कर्मणां शिक्षाऽस्मिन्नेव भवे त्वया संपूर्णीकृता, ऋणं च प्रत्यादत्तं, तस्य प्रतिदान-(બદલો) महं कथं करोमीति (વાળું) ?' । एवं बहुशः साश्रुरुद्धकंठं (ગદ્ગદ્ કંઠે) स वदति स्म ॥ रोगोपद्रवः शमितः । सर्वत्र रुदज्जनानां रोदनशब्दा अप्युपशमिताः । क्रमेण जनतेममुपसर्गं (આફત) व्यस्मरत् । संप्रति क्वापि तद्वार्त्ता न श्रूयते । तथापि प्रतिरात्र्युटजसदृशैकसदनादात्मनः सुवासनासद्गंभीरहृदयप्रार्थनाया ध्वनिरेकहृद्ववदनाच्छ्रूयते, यथा 'दुःखरोगास्त्वपायस्थानसूचक-(ખડક-ખરાબાને જણાવનાર) दीपकोष्ठक-(દીવાદાંડી) समाः सन्ति । हे दयालो ! अज्ञानतिमिराज् ज्ञानतेजसि नीतोऽस्मि, तर्हि जीवितपर्यन्तं तथैव नेयस्त्वया नाथ ! नेयोऽह मिति' ॥ जीवनपरिवर्त्तनस्याऽऽत्मोन्नतेश्चेदमभिज्ञानं ( એંધાણી ), शिखरिणीवृत्तम्—सुखं वा दुःखं वा नहि किमपि दैवप्रजनितं, न भारो व्यर्थोऽयं स्वकृतमिदकं जीव ! शिवदम् । दुरुल्लंघ्याः शैलाः श्रमितपथिकानां पथि गता, अमीषां सौन्दर्यं श्रमनयनयोः शान्तिकरणम् ॥१॥ गीतिः—यद्यदाऽऽत्मोन्नतिकरं,



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

ह्यज्ञजनानां सुदुष्करं भवति । कृतकर्मभुक्तिसमये, यः सुज्ञोऽनुरंजते सुकष्टेऽपि ॥ २ ॥ यदा जीवनस्य सन्ध्यायां विविध-वस्तुसंभृतसकलसंसारे [ભર્યા ભાદર્યા આ સંસારમાં] आशायाः स्पष्टकिरणसदृशो-[આછા કિરણ સરખો]ऽन्धयष्टिसमो मात्रमेक एव युवकस्कंधधरपुत्रो (યુવાન કંધોધર પુત્ર) ऽवसानं प्राप्तस्तदा ज्योतिश्चन्द्रस्याऽक्ष्णोरेकमप्यश्रु नाऽऽयातम् । तदा स आकाशाऽभिमुखं दृष्ट्वेयन्मात्रमेवाऽवदद्यद् 'अमुना मया पापेन पुराऽऽत्मानो नैके संतापिताः सन्ति (ઝૂરવ્યા છે) तदा दैवो मां कथं न परितापयेत् ? । गच्छ (બાપુ) पुत्र ! गच्छ, मया ऽनेकेषामाशा भग्नाऽस्ति तर्हि सांप्रतं नियति-(કુદરત) र्ममाऽऽशां भनक्ति किमत्र चित्रमिति ? " ॥ यौवने क्रूरतया ज्योतिश्चन्द्रस्याऽश्रूणि शोषितान्यासन् परमन्तिमाऽवस्थायां पूर्वकृतक्रूरतोपरि रुदित्वा रुदित्वाऽक्षिवारीणि क्षयंगतान्यभवन् । कतिपयवर्षपूर्वाणि विस्मृतदिनानि स्मृत्वा दिष्टाऽऽदेशा ज्योतिश्चन्द्रेण वीरहृदयेन स्वीकृताः (ઝીલ્યા હતા) ॥ अद्यतनो ज्योतिश्चन्द्रः पूर्वस्मान्मूलतः (તદ્દન) पृथगासीत् । अधुना तु स ज्ञानचारित्रसेवानां जीवज्-जागृज्-ज्योतिः-स्वरूप एवा-[ मूर्त्तिरेवा-] सीत् । यौवनेऽनेनाऽनेकनाट्यप्रयोगा नटिताः, किन्तु विषमविपत्त्या स पुनर्मनुष्योऽभूयत । महारोगप्रचारेण ( કોલેરાના રોગચાળે ) तु तस्य जीवनपरिवर्त्तनमेवाऽक्रियत । बहुलक्षप्रमाणवित्तं तस्य प्रभून् (તેના માલેકને) मृत्युरोगादिभ्यो रक्षितुं नालं जातं, किन्तु ते लक्षपतयस्तद्धनं स्वसार्थमपि नेतुं न शक्ता-स्तत्तु तेन ज्योतिश्चन्द्रेण प्रत्यक्षं दृष्टं, तदा तस्य हृदयं केनापि करुणदुःखेन रुदितम् ॥ सहस्रशो धर्मगुरूणामेकत्रित-( સામટો ) बोध इव महारोग-( કોલેરો ) आगतो गतश्च । गच्छन् सन् ( કોલેરો જતાં જતાં ) विश्वजनानां सूचनं कुर्वन् गतो (કહેતો ગયો) यद् "अमूनि सर्वकाल-कृत्यानि ( આ બધાં કાળાં ધોળાં ) कस्यार्थं ?, " जीवितं किं ?, जले खण्डापिण्डम् ( પતાસું ) " तर्हि



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

का एषा कूटप्रपंचकेलिः ? ”। तद्दिनादारभ्य ज्योतिश्चन्द्रस्याऽऽत्मनि साधुजीवनस्य ज्योतिः ( રોશની ) प्रकटिता। सद्भाग्यस्य शुभः क्षणः कदाचिन् मनुष्यजीवने समायाति, जीवनपरिवर्त्तनं च कृत्वा गच्छति। जागृताऽऽत्मेमं क्षणं संलक्षयितुं (પિછાણી) शक्नोति। एतादृश एकः क्षणो ज्योतिश्चन्द्रमागतः कथयंश्च गतो यद्—भुजंगप्रयातवृत्तम्—सुखं वाऽतिदुःखं पुना रोगशोका—यहो भव्य ! सर्वं त्विदं मित्ररूपम्। तवाऽऽजीवनस्याऽथ चैतन्यदाता, प्रबोधो भवेच्चेत्तदा मुक्तिगामी ॥ १ ॥

अन्ते ज्योतिश्चन्द्रस्य धर्मपत्न्यपि स्वर्गं गता। तदा सोऽचिन्तयद् यद् “ वरं जातं, सर्वोपाधिविमुक्तोऽहमाजीवनं प्रभुभक्तिमद्यप्रभृतेः करिष्यामीति ” ज्ञानगर्भितवैराग्यपूर्वकमात्मसाधनं कृत्वाऽन्ते समाधिना सद्गतिं वृतः ॥ उपसंहारः—मन्दाक्रान्तावृत्तम्—

भो भो भव्या ! अबुधजनता कर्म कीदृक्करोति ?, पश्चात्तापं भवति हि यदा तत्फलं ना भुनक्ति।
यो बुद्धः स्यात् स सरलतया पश्यति स्वापराधं, ज्योतिश्चन्द्रं स्मरति च सदा सद्गतिं याति सत्त्वात् ॥१॥

शार्दू०—सूरिश्रीगुरुनागचन्द्रचरणांभोजालिना योजितं, गैर्वाण्ये गिरि रत्नचन्द्रमुनिना गद्यं चरित्रं वरम्।
ज्योतिर्वृत्तपरिवर्त्तनोपरि जनै र्धार्यं सुभद्रेच्छुभिः, सौम्ये युग्मसहस्रलोकगणिते संवत्सरे विक्रमे ॥२॥

आर्या—षट्सराभिधग्रामे, स्थित्वा चातुर्मासं गुरुसार्धम्। रक्षाबन्धन—दिवसे, चन्द्रवासरे कृतं पूर्णम् ॥३॥

उपेन्द्र०—श्रुत्वा चरित्रं हृदये दधातु, कृत्वा विचारं जनता निजार्थम्।
ज्ञात्वाऽऽत्मसारं त्वभयं ददातु, नत्वा जिनेन्द्रं सुखभाक् सदाऽस्तु ॥४॥

श्रीजैनप्रकाशपत्रागतगुर्जरभाषा—वृत्तपरिवर्त्तनलेखादुध्धृत्य संस्कृतभाषायां निर्मितमिदं चरित्रम् ॥ ॐ शान्तिः ॥



P.P. Ac. Gunratnasuri M.S. Jun Gun Aaradhak Trust

109303

# ॥ ज्योतिश्चन्द्र-चरित्रस्य कठिनशब्दानां शब्दकोशः ॥

| | पृष्ठ. | पंक्तिः |
|---|---|---|
| राजशासनम्=કાયદો. | २ | ८ |
| वधशिक्षा=ફાંસી. | २ | १० |
| शीलं दापयित्वा=જપ્ત કરીને. | २ | १४ |
| नरवधः=ખૂન. | ३ | १५ |
| नरवधकारी=ખૂની. | ३ | ११ |
| न्यायनिर्णयः=ચૂકાદો. | ३ | १२ |
| कूटरचना-प्रपंचः=પોગળ. | ४ | १ |
| कोमलः=નરમ. | ५ | ४ |
| लघुता=નમ્રતા. | ५ | ५ |
| अविलासिता=સાદાઇ. | ५ | ५ |
| उत्पादिता=જગાડી. | ५ | ६ |
| उटजः=ઝુંપડું. | ५ | ७ |
| कर्पटापणः=કાપડની દુકાન. | ५ | ९ |
| कार्यकरः-सेवकः=મુનીમ. | ५ | १० |

| | पृष्ठं. | पंक्तिः |
|---|---|---|
| प्रतिष्ठा=શાંખ. | ५ | १४ |
| दुष्कर=આકરૂં. | ५ | १४ |
| रूप्यकम्=રૂપીઓ. | ५ | १५ |
| आणकम्=આનો. | ५ | १५ |
| -मलोत्सर्गः प्रायेण जातोऽभवत्=મનનો મેલ લગભગ ધોવાઈગયો હતો. | ५ | ३-४ |
| पूर्वात्यमानवशठ=આગળનો નર શયતાન. | ५ | ४ |
| कारागृहदुःस्थित्या=જેલની કંગાલીયત હાલત. | ५ | ४-५ |
| प्रतिष्ठाविस्तरावधि=શાંખ જામે ત્યાં સુધી. | ५ | १४ |
| महारोगप्रचारेण=કોલેરાના રોગચારે. | ९ | १० |
| जीवनपरिवर्त्तनम्=હૃદયપલટો. | ९ | ११ |
| बहुलक्षप्रमाणवित्तम्=લાખોની મિલ્કત. | ९ | ११ |
| सहस्रशो धर्मगुरूणामेकत्रितबोध इव=હજારો ધર્મગુરૂઓના સામટા બોધ જેવો. | ९ | १३ |



P.P. Ac. Gunratnasuri M.S.
Jun Gun Aaradhak Trust

| | पृष्ठं. | पंक्तिः |
|---|---|---|
| कूटप्रपंचकेलिः=કૂડની રમત. | १० | १ |
| पर्याप्तम्=પૂરતું. | ५ | १५ |
| आणकचतुर्थांशः=પૈસો. | ५ | १५ |
| प्रतिदानम्=વળતર. | ६ | ६ |
| ,, બદલામાં આપવું. | | |
| अभिज्ञः=જાણીતો. | ६ | ३ |
| अनभिज्ञः=અજાણ્યો. | ६ | ३ |
| ग्रामीणः=ગામડીયો. | ६ | ३ |
| नगरजनः=નાગરિક. | ६ | ३ |
| कृषिकारः-बलः= ખેડુત. | ६ | ३ |
| वासोग्रंथी=કાપડની ગાંસડી. | ६ | ४ |
| अपाययुक्ताः=નુકશાની વાળા. | ६ | ५ |
| सार्धैकरूप्यकम्=દોઢ રૂપીયો. | ६ | ५ |
| वस्त्रसंस्था=કુંપની. | ६ | ५ |
| पेटकः=પેટી-ગલ્લો. | ६ | १० |
| अन्याययुक्त=હરામના. | ६ | १० |

| | पृष्ठं. | पंक्तिः |
|---|---|---|
| मुद्रित पत्राणि=નોટો. | ६ | १३ |
| प्रभो !=સાહેબ-શેઠ. | ६ | १३ |
| चिह्नम्=છાપ. | ६ | १४ |
| स्वांगोद्यम=જાતમહેનત. | ७ | १ |
| सावधानतया=કાળજીપૂર્વક. | ७ | २ |
| व्यासंगः-संसर्गः=ચેપ. | ७ | २-३ |
| वित्तं-रिक्थम्=મિલ્કત-મૂળી. | ७ | ५-६ |
| अदूरम्=હાથ વેંતમાં. | ७ | ४ |
| महद्दुःस्थितिः-अनिष्टम्=પાયમાલી. | ७ | ५ |
| वस्त्रखण्ड=રૂમાલ. | ७ | ५ |
| कालकृत्यानि=કાળાં ધોળાં. | ३ | ४ |
| ज्योतिः=રોશની. | १० | १ |
| प्रक्षिप्=પધરાવવું-નાંખી દેવું. | ७ | ५ |
| तलम्=તળીએ. | ७ | ६ |
| धर्मकार्यम्=ધર્માદો. | ७ | ७ |
| कार्यालया=ખાતા. | ७ | ११ |



P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

| | पृष्ठं. | पंक्तिः |
|---|---|---|
| आढकः=કળશી. | ७ | १२ |
| वर्त्तमानप्रवृत्तिः-प्रवर्त्तनम्=વાતાવરણ. | ७ | १३ |
| विलुप्स्यति=બગાડશે. | ७ | १३ |
| महारोगोपद्रवः-विशूचिकोपद्रवः=કોલેરા. | ७ | १५ |
| प्रसृतः=ફાટી નીકળ્યો. | ७ | १५ |
| पिधत्तः=બંધ કર્યો. [ધંધો.] | ८ | १ |
| स्वल्पानल्पा=થોડી ઘણી. | ८ | २ |
| विलुप्=ભૂંસી નાંખવું. | ८ | ४ |
| खण्डापिण्ड=પતાસું. | ९ | १५ |
| हृ=ઝડપી લેવું-હરણ કરવું. | ८ | ५ |
| प्रत्यादा-कृन्त्=ખત્તમ કરવું. | ८ | ८ |
| साश्रुरुद्धकंठम्=ગદ્‌ગદ્‌ કંઠે. | ८ | ९ |
| उपसर्ग=આફત. | ८ | १० |

| | पृष्ठं. | पंक्तिः |
|---|---|---|
| अपायस्थानसूचकः=ખડક-ખરાબાને જણાવનાર. | ८ | ११ |
| दीपकोष्ठकः=દીવાદાંડી. | ८ | १२ |
| स्कंधधरः-पुत्रः=કંધોધર. | ९ | ३ |
| संतापिताः=ઝૂરવ્યા. | ९ | ४ |
| दैवं-नियतिः-दिष्टम्=ગેબીસત્તા. | ९ | ४-६-८ |
| क्षयंगम्=ખૂટવું-નાશ પામવું. | ९ | ७ |
| स्वीकृताः=ઝીલ્યા. | ९ | ८ |
| मूलतः=તદ્દન. | ९ | ८ |
| नाट्यप्रयोगः=ખેલ. | ९ | १० |
| नटिताः=ખેલ્યા. | ९ | १० |
| संलक्ष्=પિછાણવું-ઓળખવું. | १ | ३ |



P.P. Ac. Gunratnasuri M.S.

Jun Gun Aaradhak Trust

# ज्योतिश्चन्द्र चरित्रनुं शुद्धि-पत्रक

| पृष्ठ. | | पंक्तिः. | अशुद्ध. | शुद्ध. |
|---|---|---|---|---|
| १ | | ३ | श्रीज्ञानिपुरुषः | श्रीज्ञानिपुरुषैः |
| १ | | ३ | सर्वाप्रणिनः | सर्वप्राणिनः |
| ४ | | ९ | स्वय | स्वयं |
| ५ | | १२ | ऽनीत्यव | ऽनीत्यैव |
| ६ | | १ | ठ्यथार्थ | व्ययार्थं |
| ७ | | १ | कत्तु | कर्तुं |
| ७ | | ६ | श्रष्ठिन् ! | श्रेष्ठिन् ! |
| ८ | | १ | ज्योतिश्चन्द्रण | ज्योतिश्चन्द्रेण |
| १० | | ४ | सवं | सर्वं |
| १२ | बीजा कोलमनी छेल्ली | | १ ६ | १० ३ |
| १३ | बीजा कोलम ६ | | ९-४-६-८ | ९-५-६-८ |



P.P. Ac. Gunratnasuri M.S.